प्रकारार्थे कन्। अणुप्रकारे, अणुशब्दार्थे चीनादिधान्ये) चतुरः। निपुणः। अल्पः। स्तोकः। इति मेदिनी ॥

अणुभा, स्त्री, (अणुः सूक्ष्मा भा दीप्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति त्रिकाण्डशेषः ॥

अणुरेवती, स्त्री, (अणुः सूक्ष्मा रेवती नक्षत्रमिव ।) दन्तीवृक्षः। इति राजनिर्घण्टः ॥

अणुव्रीहिः, पुं, (अणुः सूक्ष्मः व्रीहिः, कर्म्मधारयः, चीनादि।) सूक्ष्मधान्यं। तत्पर्य्यायः। प्रसातिका २। इति रत्नमाला ॥

अण्डं, क्ली, (अम् संयोगे भावे क्विप् अमं संयोगं डयन्ते गच्छन्त्यनेन अम्+डी+ करणे डः। पुंसोऽवयवभेदे मुष्के, पक्षिडिम्बे। "तदण्डमभवद्धैमं सहस्रांशुसमप्रभमिति" मनुः।)। पक्ष्यादिप्रादुर्भावककोषः। अण्डा। डिम्। इति भाषा। तत्पर्य्यायः। पेशी २ कोषः ३। इत्यमरः ॥ पेशिः ४ कोशः ५ पेशीकोषः ६। इति तट्टीका ॥ डिम्बः ७। इति मेदिनी ॥ मत्स्यपक्षिकूर्म्माण्डानां गुणाः,—

("नातिस्निग्धानि वृष्याणि स्वादुपाकरसानि च। वातघ्नान्यतिशुक्राणि गुरूण्यण्डानि पक्षिणाम्" ॥ इति वैद्यके ।)

स्वादुत्वं। कटुपाकित्वं। रुचिशुक्रकारित्वं। वातश्लेष्मनाशित्वञ्च। इति राजवल्लभः ॥ मुष्कः। वीर्य्यं। इति विश्वः ॥ मृगनाभिः। इति केचित् ॥

अण्डकः, पुं, (अण्ड + स्वार्थे कन्) अण्डकोषः। इति हेमचन्द्रः ॥

अण्डकोटरपुष्पी, स्त्री, (अण्डवत् कोटरे अभ्यन्तरे पुष्पं यस्याः सा बहुव्रीहिः,स्त्रियां ङीष्।) अजान्त्रीवृक्षः। नीलशाखा। नीलबुङ्गा इति ख्याता। इति काचिद्रत्नमाला ॥ अन्तःकोठरपुष्पी इत्यपि पाठः ॥

अण्डकोशः, पुं, (अण्डस्य मुष्कस्य कोशः, षष्ठीतत्।) अण्डकोषः। इत्यमरटीका ॥

अण्डकोषः, पुं, (अण्डस्य मुष्कस्य कोषः, षष्ठीतत्पुरुषः।) स्वनामख्यातशरीरावयवविशेषः। तत्पर्य्यायः। मुष्कः २ वृषणः ३। इत्यमरः ॥ अण्डं ४ पेलं ५ अण्डकः ६। इति हेमचन्द्रः ॥ वीजपेशिका ७। इति राजनिर्घण्टः ॥ सीमा ८। इति जटाधरः ॥ फलकोषकः ९। इति त्रिकाण्डशेषः ॥ फलं १०। इति रामायणं ॥ कोषकोषकमुष्काण्डवृषणा अण्डकोषकः। सीमा च पेलसीमानौ फलमित्यपि कुत्रचित् ॥ इति शब्दरत्नावली ॥

अण्डकोषकः, पुं, (अण्डकोष+स्वार्थे कन्) अण्डकोषः। इति शब्दरत्नावली ॥

अण्डजः, पुं, (अण्डे जायते अण्ड+जन्+कर्त्तरि, ड उपपदसमासः) पक्षी। सर्पः। मत्स्यः। कृकलासः। इति विश्वमेदिन्यौ ॥ अण्डजातमात्रे त्रि। इत्यमरः ॥

("अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः। यानि चैवंप्रकाराणि स्थलजान्यौदकानि च" ॥ इति मनुः।)

अण्डजा, स्त्री, (अण्डे जायते इति अण्ड+जन्+कर्त्तरि ड, उपपदसमासः, स्त्रियां टाप्।) मृगनाभिः। कस्तूरी। इति विश्वमेदिनीहेमचन्द्राः ॥

अण्डालुः, पुं, (अण्डं विद्यते यस्य अण्ड+मत्वर्थे आलुच्) मत्स्यः। इति शब्दचन्द्रिका ॥

अण्डीरः, पुं, (अण्ड+मत्वर्थे ईरन्, विशिष्टसामर्थ्यवान्।) पुरुषः। शक्तः। इति मेदिनी ॥

अण्वी, स्त्री, (अणु+वोतोगुणवचनादिति पक्षे ङीष्) अङ्गुलिः। अस्याः प्रचुरप्रयोगो वेदे। क्षीणा ॥

अत, इ बन्धने (इदित्वात् नुम् आदिं सेट् परं) इति कविकल्पद्रुमः ॥ अन्तीति बध्ने। शेषो दीर्घादिरित्यन्यः। अतएव अन्त्यते ईन्त्यते। स्वमते तु अन्त्यते इन्त्यते। छन्दोऽनुरोधादुभयत्र इकारः ॥ इति दुर्गादासः ॥

अत ई बन्धने। इति कविकल्पद्रुमः ॥

अत सातत्यगतौ। इति कविकल्पद्रुमः ॥ सातत्यगतं नैरन्तर्य्येण भ्रमणं प्रापणञ्च। अतति वायुः। अतति सूर्य्यो गगनं प्राप्नोतीत्यर्थः। इति दुर्गादासः।

अतः, [स्] व्य, (एतस्मात्, एतद्+एतदोऽशिति पञ्चम्यर्थे तस् एतद्शब्दस्य अशादेशः) कारणं। अपदेशः। निर्द्देशः। इति विश्वः ॥

अतएव, व्य, (एतद्+तस् पञ्चम्यर्थे तस्। एतदः अन् इति एकारस्य अकारः।) अस्मादेव। एतत्कारणेनैव। अनेनैव हेतुना। यथा,—

"अतएव महेशानि रलयोः समता भवेत्"। इति सारदातिलकटीकायां राघवभट्टः ॥ अतएव मं। इति वोपदेवः ॥

अतटः, पुं, (तट्यते आहन्यते जलेन इति तट्+घञर्थे कः, तटं जलप्रपातस्थानं न विद्यते अस्य बहुव्रीहिः) पर्व्वतस्योच्चस्थानं। तत्पर्य्यायः। प्रपातः २ भृगुः ३। इत्यमरः ॥ (यथा शाकुन्तले। मनोरथानामतटप्रपातः ॥)

अतर्कः, पुं, (तर्क्यतेऽनेन तर्क + घञर्थे कः। तर्कस्तर्कहेतुः स नास्ति यस्य स बहुव्रीहिः) अहेतुकः। शुष्कतर्कपरः। इति महाभारते दानधर्म्मः ॥

अतलं, क्ली, (नास्ति तलं गाधभागो यस्य तत् बहुव्रीहिः। अतलस्पर्शमिति व्युत्पत्त्यर्थः।) प्रथमखण्डपातालं। भूरिप्रयोगः ॥

अतलस्पर्शः, त्रि, (नास्ति तलस्य अधोभागस्य स्पर्शो यस्य स बहुव्रीहिः।) अगाधः। अतिगभीरः) इत्यमरः ॥

अतलस्पृक् [श्] त्रि, (न तलं गाधभागः नञ्समासः, तत् स्पृशति यः अतल+स्पृश्+कर्त्तरि क्विन् अतलस्पर्शकारी। कर्म्मणि क्विन् तत् स्पृश्यते येन।) अतलस्पर्शः। तत्पर्य्यायः। अस्थाः २ अस्थाग ३ अस्ताघ ४ अगाधं ५। इति हेमचन्द्रः ॥

अतसः, पुं, (अतति सततं गच्छति यः अत्+कर्त्तरि असच्, स्त्रियां ङीष्।) (अतसीवृक्षविशेषः) वायुः। इत्युणादिकोषः ॥ आत्मा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ वल्कलनिर्म्मितवस्त्रं। अस्त्रं। यथा—"अतसः क्षौमं प्रहरणं वायुश्चेति धातुवृत्तौ" माधवः ॥

अतसी, स्त्री, (अत्+असच्, स्त्रियां ङीप्।) क्षुद्रपुष्पवृक्षविशेषः। मसिना इति ख्याता। तत्पर्य्यायः। चणका २ उमा ३ क्षौमी ४ रुद्रपत्नी ५ सुवर्च्चला ६। इति रत्नमाला ॥ पिच्छिला ७ देवी ८ मदगन्धा ९ मदोत्कटा १० क्षुमा ११ हैमवती १२ सुनीला १३ नीलपुष्पिका १४। अस्या गुणाः। उष्णत्वं। तिक्तत्वं। वातहारित्वं। श्लेष्मपित्तकारित्वञ्च। अस्यास्तैलस्य गुणाः। मधुरत्वं। पिच्छिलत्वं। मदगन्धित्वं। कषायत्वं। वायुकफकासनाशित्वं ॥ स्वादुत्वं। उष्णत्वं। अम्लत्वं। पाके कटुत्वञ्च। इति राजवल्लभराजनिर्घण्टौ ॥ यथा,—

"अतसी नीलपुष्पी च पार्व्वती स्यादुमा क्षुमा। अतसी मधुरा तिक्ता स्निग्धा पाके कटुर्गुरुः। उष्णा दृक्शुक्रवातघ्नी कफपित्तविनाशिनी" ॥ इति भावप्रकाशः ॥ शणवृक्षः। इत्यमरटीका ॥

अति, व्य, प्रशंसा। (अत्+इ। पूजायां। अतिरतिक्रमणे चेति। अत्यादयः क्रान्ताद्यर्थे इति पाणिनिसूत्रम्।) प्रकर्षः। लङ्घनं। इति विश्वमेदिन्यौ ॥ अतिशयं। क्रान्तं। पूजनं। असम्भावना। इति दुर्गादासः। प्रादिविंशत्युपसर्गान्तर्गतोऽयं ॥

अतिकथः, त्रि, (कथामतिक्रान्तः कुगतिप्रादय इति समासः। कथनायोग्यः।) अश्रद्धेयः। नष्टः। इति मेदिनी ॥ नष्टधर्म्मः। इति हेमचन्द्रः ॥

अतिकथा, स्त्री, (अत्युत्कृष्टा कथा कर्म्मधारयः।) अपार्थवाक्यं। व्यर्थभाषणं। इति विश्वः हेमचन्द्रश्च ॥

अतिकन्दकः, पुं, (अतिरिक्तः कन्दो मूलं यस्य कप्) हस्तिकन्दवृक्षः। इति राजनिर्घण्टः ॥

अतिकेशरः, पुं, (अतिरिक्ताः केशराः किञ्जल्काः यस्य सः।) कुब्जकवृक्षः। इति राजनिर्घण्टः ॥

अतिक्रमः, पुं, (अतिक्रान्तः क्रमः नियमः, अति क्रम्+भावे घञ् वृद्ध्यभावः) क्रमोल्लङ्घनं। तत्पर्य्यायः। अतिपातः २ (अति पत्+भावे घञ्) उपात्ययः ३ पर्य्यायः ४। अभिक्रमः। रणे शत्रून् प्रति अभीतयोधादेर्गमनं। इत्यमरः ॥

अतिक्रान्तः, त्रि, (अति+क्रम्+कर्त्तरि क्तः) कृतातिक्रमः। कृतक्रमोल्लङ्घनः। राजानमतिक्रान्ता अतिराजी। इति वोपदेवः ॥ अतीतः। यथा। वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते। इति रक्षितः ॥

अतिक्रामकः, त्रि, अतिक्रमकर्त्ता। क्रमोल्लङ्घकः। अतिपूर्व्वक्रमधातोः कर्त्तरि णकः ॥

अतिगण्डः, पुं, (गण्डमतिक्रान्तः अत्यादयः क्रान्ताद्यर्थे।) विष्कुम्भादिसप्तविंशतियोगमध्ये षष्ठयोगः। तत्र जातफलं।

"कलिप्रियो वेदविनिन्दकश्च
धूर्त्तः कृतघ्नो गलरोगयुक्तः।